# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री | प्रश्नपत्रम् – ४ | गुणाः – ५० |
| विषयः – संस्कृतसंभाषणम् | सत्रम् – ६ (OLD) | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – १६/०७/२०२१ | सन्दर्भग्रन्थः – संक्षेपरामायणम् | |

सूचना - निम्नलिखितेषु दशसु प्रश्नेषु केचित् पञ्च प्रश्नाः विधेयाः।
प्रत्येकं प्रश्नस्य समानगुणाः। (१०)

**प्रश्नः १ कयोश्चिद द्वयोः श्लोकयोः व्याख्या कार्या।** १०

१ चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात्।
रम्यमावसथं कृत्वा रामायणा वने त्रयः।।

२ ज्येष्ठं ज्येष्ठगुणैर्युक्तं प्रियं दशरथं सुतम्।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया।।

३ इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी।।

**प्रश्नः २ श्रीरामचन्द्रस्य गुणानुवर्णनं यथाग्रन्थं लिखत।** १०

**प्रश्नः ३ श्रीरामचन्द्रस्य देहवर्णनं यथाशास्त्रं प्रतिपादयत।** १०

**प्रश्नः ४ कयोश्चिद् द्वयोः श्लोकयोः व्याख्या कार्या।** १०

१ प्रतिज्ञातश्च रामेण वधः संयति रक्षसाम्।
ऋषीणामग्निकल्पानां दण्डकारण्यवासिनाम्।।

२ मार्गमाणो वने सीतां राक्षसं संददर्श ह।
कबन्धं नाम रूपेण विकृतं घोरदर्शनम्।।

३ रामायाविदितं सर्वं प्रणयाद् दुःखितेन च।
प्रतिज्ञातं च रामेण तदा वालिवधं प्रति।।

**प्रश्नः ५ दण्डकारण्यराक्षसवधं निरुपयत।** १०

**प्रश्नः ६ सुग्रीवमैत्रीं तथा वालिहननं यथाग्रन्थं निरूपयत।** १०

**प्रश्नः ७ कयोश्चिद द्वयोः श्लोकयोः व्याख्या कार्या।** १०

१ ततो गृध्रस्य वचनात् सम्पातेर्हनुमान् बली।
शतयोजनविस्तीर्णं पुप्लुवे लवणार्णरम्।।

२ दर्शयामास चात्मानं समुद्रः सरितां पतिः।
समुद्रवचनाच्चैव नालं सेतुमकारयेत्।।

३ एतदाख्यानमायुष्यं पठन् रामायणं नरः।
सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते।।

**प्रश्नः ८ रामाराज्यवर्णनं स्पष्टयत।** १०

**प्रश्नः ९ हनुमता लङ्कापुरीदहनं यथाग्रन्थं प्रतिपादयत।** १०

**प्रश्नः १० निम्नलिखितेषु प्रश्नेषु दशनां प्रश्नानां लघूत्तरं देयम्।**

१ दशरथस्य कति पुत्राः आसन् ? १०
२ भरतस्य मातुः नाम किमस्ति ?
३ सुग्रीवस्य भ्रातुः नाम किमस्ति ?
४ सुर्पणखायाः भ्रातुः नाम किमस्ति ?
५ कस्यास्त्रस्य प्रहारं मेघनादेन हनुमति कृतम् ?
६ जटायुः कस्य मित्रमासीत् ?
७ रामस्य वनवासः कनीनां वर्षाणाम् आसीत् ?
८ सेतुनिर्माणकौशलं कस्य समीपे आसीत् ?
९ केन समुद्रोल्लङ्घनं कृतम् ?
१० द्विजेषु प्रमुखः कः ?
११ वानरराजः कः ?
१२ नन्दीग्रामे कः स्थितवान् ?
१३ विमानस्य नाम किम् ?
१४ अग्निपरिक्षा कया दत्ता ?
१५ ग्रन्थेऽस्मिन् कति श्लोकाः सन्ति ?

****